# संस्कृत वार्ता:

दिनाङ्क : 20/04/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- भारत-साउथकोरियादेशौ परस्परसहयोगं सुदृढीकृतवन्तौ । प्रधानमन्त्री नरेन्द्रमोदी राष्ट्रपतिः ली जे म्योंग् च परस्परं सन्धिपत्राणि हस्ताक्षरितवन्तौ ।
- निर्वाचन-आयोगेन निर्वाचनक्षेत्रे मतदानसमाप्तिपर्यन्तं अष्टचत्वारिंशत् होरासु मद्यविक्रये प्रतिबन्धः निर्धारितः अस्ति, मई-मासस्य चतुर्दिनाङ्के गणनादिवसे अपि मतदानसम्बद्धेषु राज्येषु केन्द्रशासितप्रदेशेषु च शुष्कदिवसः इति घोषितः अस्ति ।
- जम्मू-कश्मीरस्य उधमपुर-मण्डले बस-यान-दुर्घटनायां न्यूनातिन्यूनं एकविंशति-जनाः मृताः, राष्ट्रपतिः द्रौपदीमुर्मुवर्या प्रधानमन्त्री नरेन्द्रमोदी च अस्यां दुर्घटनायां शोकं प्रकटितवन्तौ ।
- पश्चिमबंगाल-तमिलनाडु-राज्ययोः विधानसभानिर्वाचनाय विविधदलनेकारः प्रचाराभियानॆ रताः सन्ति ।
- भारतीय-विशिष्ट-पहचान-प्राधिकरण (UIDAI) इत्यत्र शत-संस्थानानि (OVSE) इति कर्गदरहितं सत्यापन-सौविध्यम् अधिगन्तुं स्वकीयं पञ्जीकरणं कृतवन्ती ।

---------------------------------------------------------

<u>प्रधानमन्त्री-कोरिया</u>

भारत-दक्षिणकोरिया-देशौ अद्य क्रीडायाः, सांस्कृतिक-सृजनात्मक-उद्योगाणां, एम्. एस्. एम्. ई. इत्येतेषां, औद्योगिक-सहकार-समित्याः स्थापनार्थं च चतुर्षु सन्धिपत्रेषु हस्ताक्षरं कृतवन्तौ। नवदिल्ल्यां प्रधानमन्त्रिणा नरेन्द्रमोदिना दक्षिणकोरिया-देशस्य राष्ट्रपतिना ली-जे-मयुङ्ग इत्यनेन सह वार्तानन्तरं एतानि सन्धिपत्राणि अन्तिमरूपं प्राप्तानि। भारत-कोरिया-डिजिटल्-ब्रिड्ज् इत्यस्य उद्घाटनेन सह सी. ई. पी. ए. व्यापार-सन्धेः उन्नतिकरणाय संयुक्तघोषणा अपि प्रावर्तिता। प्रधानमन्त्री मोदी अवदत् यत् एतत् सहभागित्वं ए.आई.,

सेमिकण्डक्टर्स्, तान्त्रिकक्षेत्रेषु गहनसहयोगेन सह शान्तिं स्थिरतां च प्रवर्धयिष्यति। उभयदेशयोः द्विपक्षीयं व्यापारं त्रिंशदुत्तर-द्विसहस्रतमाब्दं यावत् सप्तविंशति-डालर-बिलियन्- मिततः पञ्चाशत्-बिलियन्-डालर्-पर्यन्तं वर्धयितुं लक्ष्यम् अस्ति। राष्ट्रपतिः ली-वर्यः भारतं ग्लोबल्-साउथ इत्यस्य नेता इति वर्णितवान् तथा च रक्षायां, ए.आई. इत्यस्मिन्, नौकानिर्माणे च सहयोगं प्राथयत्। उभौ नेतारौ मध्यपूर्वदेशे शान्तेः महत्त्वम् अपि अधोरेखितवन्तः।

-----------------------------------------------------------

<u>निर्वाचनायोगः- निषेधः-</u>

निर्वाचन-आयोगेन कस्मिन् अपि निर्वाचनक्षेत्रे मतदानसमाप्तिपर्यन्तं अष्टचत्वारिंशत् होरासु मद्यविक्रये प्रतिबन्धः निर्धारितः अस्ति, यस्मिन् उक्तम् अस्ति यत् अस्मिन् काले , भोजनालयेषु, आपणेषु, अथवा कस्मिन् अपि सार्वजनिक-निज-स्थानेषु मद्यस्य विक्रयणं, वितरणं वा न भविष्यति। आयोगेन मई-मासस्य चतुर्दिनाङ्के गणनादिवसे अपि मतदानसम्बद्धेषु राज्येषु केन्द्रशासितप्रदेशेषु च शुष्कदिवसः इति घोषितः अस्ति, तथा च व्यक्तिद्वारा मद्यसञ्चयस्य प्रतिबन्धः भविष्यति, अनुज्ञापत्ररहित-परिसरेषु उत्पादशुल्क-नियमाः च कठोरतया प्रवर्तिताः भविष्यन्ति इति सूचितम्।

-----------------------------------------------------------

<u>तमिलनाडुः-निर्वाचननियमः</u>

तमिलनाडुराज्ये मुख्य निर्वाचनाधिकारी अर्चनापटनायकः इत्येषा श्वः सायङ्कालात् निर्वाचनसमाप्तिपर्यन्तं प्रभाविनः नव-नियमान् घोषितवती, येषु सामाजिक-माध्यमानां, विद्युन्मान-सम्प्रेषणस्य, सार्वजनिक-नाट्य-प्रदर्शनानां च माध्यमेन निर्वाचनसम्बद्ध-विषयवस्तूनां प्रदर्शने प्रतिबन्धः अपि अन्तर्भवति। बहिःक्षेत्राणां राजनैतिकनेतृभिः

पक्षकार्यकर्तृभिः च श्वः सायं षट्वादने निर्गन्तव्यं, ततः परं स्टार-प्रचारकेभ्यः अनुमतिः अपि निषिद्धा भविष्यन्ति। मतदानदिने प्रत्याशिनः केवलं एकं वाहनं, निर्वाचन-प्रतिनिधेः कार्यकर्तृणां च एकं वाहनं च अनुमन्यते, यत्र रिटर्निङ्ग-अधिकारिः इत्यनेन अनुमतिः प्रदास्यते। मतदातृणां परिवहनार्थं वाहनानाम् उपयोगाय कः अपि प्रत्याशिः तस्य प्रतिनिधिः वा न अनुमन्यते ।

------------------------------------------------------------

## जम्मूकश्मीरः-दुर्घटना

जम्मू-कश्मीरस्य उधमपुर-मण्डले बस-यान-दुर्घटनायां न्यूनातिन्यूनं एकविंशति-जनाः मृताः, अन्ये च अनेके व्रणिताः अभवन्। रामनगर-उधमपुर-मार्गे जल्लो-ग्रामं निकषा एषा दुर्घटना अभवत् इति अधिकारिणः अवदन्। राष्ट्रपतिः द्रौपदीमुर्मुवर्या प्रधानमन्त्री नरेन्द्रमोदी च अस्यां दुर्घटनायां शोकं प्रकटितवन्तौ। सामाजिकसञ्जालीयसंदेशे अपि तौ व्रणितानां शीघ्रस्वास्थ्यलाभाय प्रार्थितवन्तौ । प्रधानमन्त्रिणा नरेन्द्रमोदिना प्रधानमन्त्री-साहाय्योद्धारकोषात् मृतकेभ्यः द्विलक्षरुप्यकाणां वर्णितेभ्यः त पञ्चाशत्सहस्ररूप्यकाणां साहाय्यराशिः उद्घुष्टा । जम्मू-कश्मीरस्य उपराज्यपालः मनोजसिन्हः घटनायाः विषये दुःखम् प्रकटितवान्। सामाजिक-माध्यमे, श्री सिन्हा-वर्यः मृतानां परिवारान् प्रति गभीरं शोकं प्रकटितवान् तथा च व्रणिताः शीघ्रं स्वस्थाः भवेयुः इति प्रार्थयत्। सिन्हा अवदत् यत् सः जनपद-प्रशासनं, आरक्षकाः, राज्य-विपद्-प्रतिक्रिया-बलम्, स्वास्थ्य-विभागम् इत्येतान् प्रभावितजनान् सर्वान् सम्भवान् साहाय्यं दातुं निर्देशं दत्तवान् इति। प्रधानमन्त्रीकार्यालयस्य केन्द्रीय-राज्यमन्त्री तथा कठुआ-उधमपुरतः लोकसभायाः सदस्यः जितेन्द्रसिंहः अवदत् यत् तत्क्षणमेव उद्धारकार्यस्य आरम्भः कृतः, जनानां कृते सर्वं सम्भवं साहाय्यं प्रदत्तम् अस्ति ।

------------------------------------------------------------

## प्रचाराभियानम्-पश्चिमबङ्गाल-तमिलनाडुः

श्चिमबंगाल-तमिलनाडु-राज्ययोः विधानसभानिर्वाचनाय प्रचाराभियानं तीव्रतरम् अभवत्। विभिन्न-राजनीतिक-दलानां वरिष्ठनेतारः मतदानपूर्वं अन्तिमेषु दिनेषु जनसभानां जनयात्राणां च एकां शृंखलां आयोजयन्ति । भाजपेति दलस्य नेता केंद्रीयमंत्री च जे. पी. नड्डा इत्येषः बांकुरा-जनपदस्य कोतुलपुरक्षेत्रे एकां जनसभां कुर्वन्ति । दलस्य नेता राजनाथ-सिंहः बीरभूमक्षेत्रे एकां निर्वाचनजनसभां सम्बोधितवान् अपरत्र भाजपादलस्य राष्ट्रियाध्यक्षः नितिन-नबीनः इत्यनेन पूर्वी-मिदनापुर-क्षेत्रे एका जनयात्रा कृता । तृणमूल-कांग्रेस इति दलस्य नेता अभिषेक-बनर्जी इत्यसौ बांकुराजनपदस्य रानीबांधक्षेत्रे एकां जनसभा संबोधयति । तमिलनाडुराज्ये , तेलुगु-देशम-पार्टीति दलस्य नेता आंध्रप्रदेशस्य मुख्यमंत्री च चंद्रबाबूनायडू इत्यसौ केन्द्रीय-नागरिक-उड्डयन-मंत्री टी.डी.पी इति दलस्य नेता किंजरापु-राममोहन-नायडू इत्यनेन सह सम्मिल्य कोयंबटूरजनपदे एन.डी.ए. इति ग्रन्थिबन्धनाय प्रचारम् अकरोत् । कांग्रेसदलस्य नेता राहुलगांधी राज्ये अनेकेषु क्षेत्रेषु निर्वाचनसभाः समबोधयत् । टी.वी.के. इत्यस्य अध्यक्षः अभिनेता च विजयः इत्यनेन पोन्नेरी-विधानसभा-क्षेत्रस्य पंचट्टीक्षेत्रे प्रचारः कृतः ।

---------------------------------------------------------------

<u>आधारः</u>

<u>भारतीय-विशिष्ट-पहचान-प्राधिकरण</u> (UIDAI) इत्यनेन एका विशिष्टा उपलब्धिः अधिगता अस्ति । अस्य प्रारम्भानन्तरं मासत्रयाभ्यन्तरम् एव शत-संस्थानानि (OVSE) इति सत्यापन-सौविध्यम् अधिगन्तुं स्वकीयं पञ्जीकरणं कृतवन्ती। अनेन सुरक्षितं, सहमत्याधारितं कर्गद-रहितं च आधार इत्यस्य सत्यापनं वर्धिष्यते। इलेक्ट्रॉनिक्स्-सूचना-प्रौद्योगिकी-मंत्रालयः प्रावोचत् यत् एतेषु संस्थानेषु सर्वकारीयाः विभागाः, फिनटेक-संस्थानानि, शिक्षा-क्षेत्राणि अन्यानि च विविधानि संस्थानानि सम्मिलितानि सन्ति ।

---------------------------------------------------------------

## प्रधानमन्त्री-राजस्थान

प्रधानमंत्री नरेंद्रमोदी श्वः राजस्थानस्य बालोतरास्थे पचपदराक्षेत्रे देशस्य प्रथमं 'ग्रीनफील्ड इंटीग्रेटेड रिफाइनरी-सह-पेट्रोकेमिकल कॉम्प्लेक्स' इत्येतत् राष्ट्राय समर्पयिष्यति। नव-मिलियन-मीट्रिक-टन-प्रति-वर्षस्य क्षमतायाः अस्य रिफाइनरी-सह-पेट्रोकेमिकल-कॉम्प्लेक्स इत्यस्य स्थापना नवसप्तति-कोटिरूप्यकाणां निवेशेन कृता अस्ति। अनया परियोजनया देशस्य ऊर्जा-सुरक्षां सुदृढं कर्तुं , पेट्रोकेमिकल-क्षेत्रे आत्मनिर्भरतां वर्धयितुं औद्योगिक-विकासं च वर्धयितुं गतिः प्रदास्यते इत्याशा वर्तते। अनया आजीविकायाः विविधानि साधनानि अपि समुत्पस्यन्ति येन सामाजिकार्थिकक्षेत्रेषु अपि विकासाय योगदानं प्रदास्यते । अस्मिन् अवसरे प्रधानमंत्री नरेन्द्रमोदी एकां जनसभाम् अपि सम्बोधयिष्यति।

------------------------------------------------------------

## सर्वकार-दक्षिणेशिया

सर्वकारः अद्य प्रोक्तवान् यत् सम्पूर्णे देशे LPG इत्यस्य उपलब्धता स्थिरा वर्तते सहैव पश्चिमेशिया-क्षेत्रेषु प्रवर्तमानेन सङ्कटेन समुत्पन्नानाम् अवरोधानाम् अनन्तरम् अपि, वितरकाणां पार्श्वे LPG इत्यस्य अनुपलब्धतायाः कीदृशी अपि सूचना न प्राप्ता। नवदिल्ल्यां एकं संबोधयन्ती, जीवाश्मतैल-प्राकृतिक-वात्येधनमंत्रालयस्य सचिवा, सुजाताशर्मा अकथयत् यत् सर्वकारः प्रभावि-प्रबंधनाय अनेकान् महत्वपूर्णपदक्षेपान् समुत्थापयति यथा- गृहोपभोक्तृणां कृते LPG इत्यस्य उत्पादनवर्धनं, नगरेषु ग्रामीणक्षेत्रेषु च अस्य उपलब्धतायाः वर्धितावधिः, LPG इत्यस्य दुरूपयोगं निराकर्तुं 'डिलीवरी ऑथेंटिकेशन कोड' इत्यस्य प्रावर्तनं चेत्यादयः पदक्षेपाः सम्मिलिताः सन्ति ।

------------------------------------------------------------

## जापान-भूकम्पः

जापानस्य उत्तर-तटात् सुदूरं,सानरिकु इत्येत् क्षेत्रं निकषा सायं त्रिपञ्चाशत्यधिक-चतुर्वादने सप्त-दशमलव-चत्वारि-परिमितस्य तीव्रवेगस्य भूकम्पः जातः यस्यानन्तरं जापानस्य ऋतुविज्ञानविभागेन सुनामी इत्यस्य सञ्चेतना प्रवर्तिता। एषः भूकंपः न्यूनातिन्यूनं दशकिलोमीटरपरिमितस्य गहनक्षेत्रे प्रावर्तत्। अपरत्र इवाते इति प्रान्तस्य कुजी-तटवर्ति-क्षेत्रे न्यूनातिन्यूनं द्वि-दशमलव-षट्-फीट-परिमितस्य उच्च-सुनामी-तरङ्गाः समङ्किताः अभवन् ।

-----------------------------------------------------------

<u>आई.पी.एल्</u>

आईपीएल् इति क्रिकेटक्रीडायां, गुजरात-टाइटन्सदलम् अद्य अहमदाबादस्य नरेंद्र-मोदी-स्टेडियम इति क्रीडाङ्गणे मुंबई-इंडियंस-दलं सम्मुखीकरिष्यति । क्रीडास्पर्धा सायं सार्धसप्तवादने भविष्यति ।

।। इति वार्ता: ।।